# Vipraih Proktam Kashivasopadesham

# વિપ્રૈઃ પ્રોક્તં કાશીવાસોપદેશમ્

## Document Information

Text title : Vipraih Proktam Kashivasopadesham

File name : vipraiHproktaMkAshIvAsopadesham.itx

Category : shiva, shivarahasya, tIrthakShetra, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam | 304-326.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# વિપ્રૈઃ પ્રોક્તં કાશીવાસોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
યેન કેનાપિ રૂપેણ કાશ્યાં સ્થાતવ્યમાસ્તિકૈઃ ।
મર્તવ્યં ચ પ્રયત્નેન કાશ્યામેવ મુમુક્ષુભિઃ ॥ ૩૦૪॥

મહાસ્મશાનસંવિષ્ટં કુણપં સર્વથા નરૈઃ ।
નાન્યત્ર નેયં તત્રૈવ ભસ્મસાત્કાર્યમાદરાત્ ॥ ૩૦૫॥

મહાસ્મશાનમરણં સુરાણામપિ દુર્લભમ્ ।
(મહાસ્મશાનમરણં પ્રાણિનામતિદુર્લભમ્)
અતસ્તત્ર પ્રયત્નેન મર્તવ્યં મુક્તિકાઙ્ક્ષિભિઃ ॥ ૩૦૬॥

(અતસ્તત્રૈવ મરણં કાઙ્ક્ષિતવ્યં વિમુક્તયે ॥) ૩૦૬॥

યાચ્યતુ મરણં કાશ્યાં બ્રહ્મવિષ્ણ્વાદિભિઃ સુરૈઃ ।
કિમ્પુનર્માદૃશૈર્મર્ત્યૈર્નિત્યધર્મસમાશ્રિતૈઃ ॥ ૩૦૭॥

બ્રહ્મવિષ્ણ્વાદિદેવાનાં કાશ્યાં મરણમિચ્છતામ્ ।
ભવિષ્યત્યેવ મરણં પ્રલયે સમુપસ્થિતે ॥ ૩૦૮॥

મરણં મઙ્ગલં કાશ્યાં કેવલં મરણં તતઃ ।
તદર્થં વિવિધા યત્નાઃ કર્તવ્યા મુક્તિકાઙ્ક્ષિભિઃ ॥ ૩૦૯॥

નૃપ પૂર્વં શરીરાણિ દગ્ધાન્યન્યત્ર ભૂરિશઃ ।
શરીરમેકદા કાશ્યાં દાહનીયં પ્રયત્નતઃ ॥ ૩૧૦॥

નૃપાનન્તશરીરાણિ દગ્ધાન્યન્યત્ર જન્મસુ ।
સકૃદ્દગ્ધે તુ દેહેઽત્ર પુનર્દાહોઽસ્ય નો ભવેત્ ॥ ૩૧૧॥

સ કાશ્યાં કાશતે શ્રીમાન્મહેશાનુગ્રહેણ યઃ ।
સ્વદેહદહનોદ્ભૂતભસ્મરાશિં વિલોકયેત્ ॥ ૩૧૨॥

શરીરં ભસ્મસાત્કૃત્વા કાશ્યાં તેનૈવ ભસ્મના ।

યઃ કાશીં ભૂષયેત્તેન સમ્પ્રામં શેષભૂષણમ્ ॥ ૩૧૩॥

યે ત્યક્તતનવઃ કાશ્યાં ત એવાતનવઃ પુનઃ ।
વામાર્ધવામાતનવશ્ચન્દ્રચૂડા ભવન્તિ ચ ॥ ૩૧૪॥

દેવતાસાર્વભૌમત્વં યસ્યાભિલષિતં ભવેત્ ।
તેન કાશ્યાં તનુત્યાગઃ કર્તવ્યઃ સાવધાનતઃ ॥ ૩૧૫॥

કાશ્યાં શરીરમાત્રસ્ય ત્યાગેનૈવ મહેશ્વરઃ ।
દત્વા પઞ્ચાક્ષરં શૈવં સ્વસ્વરૂપં પ્રયચ્છતિ ॥ ૩૧૬॥

કાશ્યાં ત્યક્તશરીરેણ શૈવેન મદનાન્તકઃ ।
મહેશો દૃશ્યતે સાક્ષાત્સર્વલક્ષણસંયુતઃ ॥ ૩૧૭॥

યસ્ય (યેન) સાક્ષાન્મહાદેવદર્શનં સમપેક્ષિતમ્ ।
તેન કાશ્યાં પ્રયત્નેન મર્તવ્યં મુક્તિકાઙ્ક્ષિણા ॥ ૩૧૮॥

મરણાભિમુખઃ કાશ્યાં યદા ભવતિ માનવઃ ।
તદા શિવોત્તરીયેણ તં વીજયતિ ચેશ્વરી ॥ ૩૧૯॥

તત્કર્ણકુહરે શમ્ભુસ્તારકં સમુપાદિશેત્ ।
પઞ્ચાક્ષરં મહામન્ત્રં શૈવં સંસારતારકમ્ ॥ ૩૨૦॥

તદા ગણાઃ સમાગત્ય દુન્દુભિધ્વનિપૂર્વકમ્ ।
ચારુચામરહસ્તાશ્ચ તન્વન્તિ વિજયધ્વનિમ્ ॥ ૩૨૧॥

મુક્તિકન્યાં તતસ્તસ્મૈ શિવો મઙ્ગલપૂર્વકમ્ ।
દદાતિ મઙ્ગલાચારાન્કુર્વન્તિ પ્રમથાસ્તતઃ ॥ ૩૨૨॥

મરણં મઙ્ગલં તસ્માત્કાશ્યાં ભવતિ ભૂપતે ।
મુક્તિકન્યાવિવાહાર્થં કાશ્યાં મર્તવ્યમેકદા ॥ ૩૨૩॥

તતઃ પરં ન મરણં કદાચિદપિ જાયતે ।
ભવત્યન્યત્ર મરણે બહુધા મરણવ્યથા ॥ ૩૨૪॥

દુરીકરોતિ તાં દેવો મહેશો મઙ્ગલાયુતઃ ।
દર્શનાર્થં મહેશસ્ય શિવપ્રાપ્ત્યર્થમેવ ચ ॥ ૩૨૫॥

મર્તવ્યં માનવૈર્ધન્યૈઃ કાશ્યાં યત્નપુરઃસરમ્ । ૩૨૬.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે રાજાપ્રતિ વિપ્રૈઃ પ્રોક્તં કાશીવાસોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૯ શિવગૌરીસંવાદે કાશીપ્રભાવકથનમ્ । ૩૦૪-૩૨૬.૧ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam . 304-326.1..

Notes:
Vipraḥ વિપ્રાઃ deliver Upadeśa ઉપદેશ (to Rājā રાજા) about the merits of staying in Kāśī કાશી especially nearing the time of one's death.

Proofread by Ruma Dewan

*Vipraih Proktam Kashivasopadesham*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*